श्रीवशिष्ठसंहितास्थं ब्रह्मर्षिश्रीवशिष्ठकृतम्

आश्रमधर्मनिरूपणम्

श्रीभरद्वाज उवाच

नमस्ते ब्रह्मविच्छ्रेष्ठ नमस्ते ब्रह्मसूनवे ।
वर्णधर्माः श्रुतास्त्वत्तः श्रीवैष्णवोपकारकाः ॥१॥
न चानाश्रमिणा भाव्यं नरेण हितमिच्छता ।
अनाश्रमी यतश्चात्र नरः कृच्छ्रेण शुध्यति ॥२॥
वैष्णवाश्रमधर्मास्तच्छ्रोतुमिच्छामि सम्प्रति ।
महर्षे त्वं समर्थोऽसि कृपया ब्रूहि तान् प्रभो ॥३॥
त्वत्तोऽधिको न कोऽप्यस्ति धर्मतत्त्वाभिधायकः ।
ततश्चाश्रमधर्मांश्च श्रोतुं यातस्त्वदन्तिकम् ॥४॥

श्रीवशिष्ठ उवाच

भरद्वाज महाभाग क्षितौ धन्यस्त्वमेव हि ।
ईदृशी धर्मजिज्ञासा जाता ते हृदये यतः ॥५॥
जिज्ञास्यं तेऽभिधास्यामः सावधानमनाः शृणु ।
शास्त्रमेव मतं प्राज्ञैर्धर्मतत्त्वप्रकाशकम् ॥६॥
चत्वार आश्रमास्तत्र वैष्णवानां महात्मनाम् ।
संन्यासो वानप्रस्थश्च गार्हस्थ्यं ब्रह्मचर्यकम् ॥७॥
भुञ्जानः सात्त्विकं भक्ष्यं विद्यार्थी गुरुसेवकः ।
ब्रह्मचारी द्विजस्तिष्ठेद् द्वादशाब्दं गुरोर्गृहे ॥८॥
अष्टमैथुनवर्ज्यात्मब्रह्मचर्यव्रते रतः ।
स्नात्वा सन्ध्यादिकं कृत्वा देवाभ्यर्चनकारकः ॥९॥
नम्रः शिखोपवीती च मेखलादण्डधारकः ।
होता स्वाध्यायकर्त्ता सन् वसेद्वि गुरुसन्निधौ ॥१०॥
गायत्रादिविभेदैश्च चतुर्धा ब्रह्मचारिणः ।
स्थाता रात्रित्रयं यावल्लवणाभक्षकश्च यः ॥११॥
गायत्री–जपकर्त्ता स **गायत्रः** समुदीरितः ।
आवेदाध्ययनं **ब्राह्मो** ब्रह्मचर्यस्य पालकः ॥१२॥
वर्षं यावत् तथाभूतः **प्राजापत्यः** प्रकीर्त्तितः ।
आजीवनं तथाभूतो **नैष्ठिको** हि गुरोः कुले ॥१३॥
आयुषश्चाचतुर्थांशं ब्रह्मचारी भवेद् द्विजः ।
आयुषश्चाद्वितीयार्धं कृतदारो **गृही** भवेत् ॥१४॥
वार्त्ताकादिविभेदैश्च गृहस्थाः षड्विधाः स्मृताः ।
सन्ध्यापञ्चमहायज्ञातिथ्यादिकर्मकारकाः ॥१५॥
वार्त्ताकः कथ्यते तत्र धार्मिकः संविचक्षणैः ।
कृषिगोरक्ष्यवाणिज्यैर्जीवति यो गृही नरः ॥१६॥
दानप्रतिग्रहाभ्यां च यजनाद् याजनात् तथा ।
पठनात् पाठनाचाथ **शालीनो** जीवति द्विजः ॥१७॥
याचित्वा सद्गृहस्थेभ्यो जीवन् **यायावरो** मतः ।
घोरसंन्यासिको भिक्षातश्चैकं निर्वहेद् दिनम् ॥१८॥
उञ्छवृत्तिर्जनः प्रोक्तः क्षेत्रोञ्छितान्नभक्षणात् ।
अयाचितो द्विजो यो हि दैवात् प्राप्तेन जीवति ।१९।
आयुषश्च द्वितीयार्धेऽवशिष्टे **वानप्रस्थता** ।
वैखानसादिभेदैश्च वानप्रस्थाश्चतुर्विधाः ॥२०॥

वैखानसास्तु नीवाराद्यैरग्निहोत्रकारकाः ।
औदुम्बरास्तु जीवन्ति फलैश्चोदुम्बरादिभिः ॥२१॥
बालखिल्या मतास्ते ये जटावल्कलधारिणः ।
अर्जितमष्टभिर्मासैरन्नमश्नन्ति पावसे ॥२२॥
जीवन्ति **फेनपाश्चाथ** शुष्कैः पर्णैः फलैस्तथा ।
तुरीयश्चाश्रमः प्रोक्तः प्राज्ञैः **संन्यासनामकः** ॥२३॥
चतुर्थांशेऽवशिष्टे तु प्रव्रज्याऽभिहिताऽऽयुषः ।
यदा वोत्कटवैराग्यं प्रव्रज्येयं श्रुतौ तदा ॥२४॥
संन्यासिनो द्विधा ज्ञेया **वैष्णवा इतरे** तथा ।
वैष्णवाश्च द्विधा **तत्रादण्डिनश्च त्रिदण्डिनः** ॥२५॥
कौपीनधारकाः कण्ठे तुलसीधारिणस्तथा ।
शिखायज्ञोपवीतोर्ध्वपुण्ड्राणां धारकाः समे ॥२६॥
*उपास्तिपञ्चकाभिज्ञाश्चार्थपञ्चककोविदाः× ।
+रहस्यत्रयवेत्तारश्चाकारत्रयसंयुताः० ॥२७॥
विरक्ताः सात्विका धीरा वेदान्तवेदिनस्तथा ।
गुरौ ब्रह्मणि मन्त्रे च धर्मे श्रद्धालवोऽपि च ॥२८॥
ब्रह्मचर्यपराश्चाथ सत्याहिंसापरायणाः ।
परोपकारकर्त्तारः §पञ्चसंस्कारसंस्कृताः ॥२९॥
श्रीसीतारामभक्ताश्च श्रीसीतारामकीर्त्तकाः ।
सीतारामप्रपन्नाश्च श्रीसीतारामचिन्तकाः ॥३०॥
श्रीसीतारामदासाश्च सीतारामपरायणाः ।
सीतारामस्वरूपज्ञाः श्रीसीतारामपूजकाः ॥३१॥
पञ्चकेशधराश्चाद्याः शिखिनो वा जटाधराः ।
हरिन्नीलं विना धौतश्वेतादिवस्त्रधारकाः ॥३२॥
कथाकीर्त्तनस्वाध्यायहोमार्चादिविधायकाः ।
आलस्यरहिता धातुकाष्ठादिपात्रधारकाः ॥३३॥
स्नानसन्ध्यादिकर्त्तारो मन्त्रराजस्य जापकाः ।
केचित्तु भस्मना सार्धमूर्ध्वपुण्ड्रजटाधराः ॥३४॥
राममन्त्रतपोभ्यां च रामाराधनतत्पराः ।
सह दण्डत्रयेणान्त्या काषायाम्बरधारकाः ॥३५॥
सीतारामौ स्मरन्तश्च काष्ठदिपात्रशालिनः ।
भ्रमन्तः पुण्यतीर्थेषु सर्वथा दम्भवर्जिताः ॥३६॥
ईशं धर्मं न निन्दन्ति स्त्रिया सार्धं वसन्ति न ।
न वित्तलोलुपा भूत्वा गच्छन्ति धनिनोऽन्तिकम् ॥३७॥
यतयः सेवनानर्हा गृहस्थवेषधारकाः ।
सेव्या विरक्तिशीलास्ते विरक्तवेषशालिनः ॥३८॥
सन्यासिनो गृहस्थत्वे त्वारूढपतनं भवेत् ।
आरूढपतनस्यात्र प्रायश्चित्तं न विद्यते ॥३९॥
इह भ्रष्टाधिकारो हि गर्हितो मानवर्जितः ।
मृतो हि नरकं गच्छत्यारूढपतितो यतिः ॥४०॥
ब्रह्मचर्यव्रतं रक्ष्यं गृहस्थान्याश्रमत्रये ।
तदभावे हि तत्स्थानामारूढपतनं भवेत् ॥४१॥
भ्रष्टाश्चाश्रमधर्मेभ्य आरूढपतिताश्च ये ।
स्वाधिकाराद् बहिष्कार्या नृपैश्च धार्मिकैश्चते ॥४२॥

---

* अभिगमन, उपादान, अर्चन, स्वाध्याय और ध्यान ये **पाँच उपासना हैं**।

× प्राप्य, प्रापक, उपाय फल और विरोधी ये **पाँच अर्थ हैं** ।

+ मन्त्रराज षडक्षर श्रीराममन्त्र, मन्त्ररत्न (द्वयमन्त्र) और चरममन्त्र ये **तीन रहस्य** हैं।

० अनन्यशरणत्व, अनन्यभोग्यत्व और अनन्यशेषत्व ये **तीन आकार हैं**।

§ तप्तमुद्रा, ऊर्ध्वपुण्ड्र, भगवद्दास्यपरकनाम, तुलसीमाला (कण्ठी, कण्ठा अथवा हीरा) और श्रीमन्त्रराज की दीक्षा ये **पाँच संस्कार हैं** ।

[पण्डितसम्राट् स्वामी श्रीवैष्णवाचार्य]